श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रम् ॥

श्रीनृसिंहो महासिंहो दिव्यसिंहो महाबलः।
उग्रसिंहो महादेव उपेन्द्रश्चाग्निलोचनः॥ १ ॥

रौद्रश्शौरिर्महावीरस्सुविक्रमपराक्रमः।
हरिकोलाहलश्चक्री विजयश्चाजयोऽव्ययः॥ २ ॥

दैत्यान्तकः परब्रह्माप्यघोरो घोरविक्रमः।
ज्वालामुखो ज्वालमाली महाज्वालो महाप्रभुः॥ ३ ॥

निटिलाक्षस्सहस्राक्षो दुर्निरीक्ष्यः प्रतापनः।
महादंष्ट्रायुधः प्राज्ञो हिरण्यकनिषूदनः॥ ४ ॥

चण्डकोपी सुरारिघ्नस्सदार्तिघ्नस्सदाशिवः।
गुणभद्रो महाभद्रो बलभद्रस्सुभद्रकः॥ ५ ॥

कराळो विकराळश्च गतायुस्सर्वकर्तृकः।
भैरवाडम्बरो दिव्यश्चागम्यस्सर्वशत्रुजित्॥ ६ ॥

अमोघास्त्रश्शस्त्रधरस्सव्यजूटस्सुरेश्वरः।
सहस्रबाहुर्वज्रनखस्सर्वसिद्धिर्जनार्दनः॥ ७ ॥

अनन्तो भगवान् स्थूलश्चागम्यश्च परावरः।
सर्वमन्त्रैकरूपश्च सर्वयन्त्रविदारणः॥ ८ ॥

अव्ययः परमानन्दः कालजित् खगवाहनः।
भक्तातिवत्सलोऽव्यक्तस्सुव्यक्तस्सुलभश्शुचिः॥ ९ ॥

लोकैकनायकस्सर्वश्शरणागतवत्सलः।
धीरो धरश्च सर्वज्ञो भीमो भीमपराक्रमः॥ १० ॥

www.prapatti.com

देवप्रियो नुतः पूज्यो भवहृत् परमेश्वरः।
श्रीवत्सवक्षाः श्रीवासो विभुस्सङ्कर्षणः प्रभुः॥ ११ ॥

त्रिविक्रमस्त्रिलोकात्मा कालस्सर्वेश्वरेश्वरः।
विश्वंभरः स्थिराभार्यश्चाच्युतः पुरुषोत्तमः॥ १२ ॥

अधोक्षजोऽक्षयस्सेव्यो वनमाली प्रकम्पनः।
गुरुर्लोकगुरुस्स्रष्टा परं ज्योतिः परायणः॥ १३ ॥

ज्वालाहोबिलमालोलक्रोडाकारञ्जभार्गवाः।
योगानन्दश्छत्रवटः पावनो नव मूर्तयः॥ १४ ॥

॥ इति श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रम् सम्पूर्णम् ॥

www.prapatti.com